घवे ६३ राघवप्रत्ययार्थंतुदुंदुभिःकायमुत्तमं दर्शयामाससुग्रीवोमहापर्वतसन्निभं ६४ उत्स्मयित्वामहाबाहुःप्रे
क्ष्यचास्थिमहाबलः पादांगुष्ठेनचिक्षेपसंपूर्णंदशयोजनं ६५ बिभेदचपुनस्तालान्सप्तैकेनमहेषुणा गिरिंरसातलंचैवजन
यन्प्रत्ययंतदा ६६ ततःप्रीतमनास्तेनविश्वस्तःसमहाकपिः किष्किंधांरामसहितोजगामचगुहांतदा ६७ ततोगर्ज
द्धरिवरःसुग्रीवोहेमपिंगलः तेननादेनमहतानिर्जगामहरीश्वरः ६८ अनुमान्यतदातारांसुग्रीवेणसमागतः निजघा
नचतत्रैनंशरेणैकेनराघवः ६९ ततःसुग्रीववचनाद्धत्वावालिनमाहवे सुग्रीवमेवतद्राज्येराघवःप्रत्यपादयत्
७० सचसर्वान्समानीयवानरान्वानरर्षभः दिशःप्रस्थापयामासदिदृक्षुर्जनकात्मजां ७१ ततोगृध्रस्यवचनात्संपातेर्ह
नुमान्बली शतयोजनविस्तीर्णंपुप्लुवेलवणार्णवं ७२ तत्रलंकांसमासाद्यपुरींरावणपालितां ददर्शसीतांध्यायंतीमशो
३ ब कैनिकागतां ७३ निवेदयित्वाभिज्ञानंप्रवृत्तिंविनिवेद्यच समाश्वास्यचवैदेहींमर्दयामासतोरणं ७४ पंचसेनाग्रगान्ह
त्वासप्तमंत्रिसुतानपि शूरमक्षंचनिष्पिष्यग्रहणंसमुपागमत् ७५ अस्त्रेणोन्मुक्तमात्मानंज्ञात्वापैतामहाद्वरात् मर्ष
यन्राक्षसान्वीरोयंत्रिणस्तान्यदृच्छया ७६ ततोदग्ध्वापुरींलंकामृतेसीतांचमैथिलीं रामाँप्रिय माख्यातुंपुनरायान्म य २
हाकपिः ७७ सोभिगम्यमहात्मानंकृत्वारामंप्रदक्षिणं न्यवेदयदमेयात्मादृष्टासीतेतितत्वतः ७८ ततःसुग्रीवसहितोग

नपुत्रमरणंकेचिद्द्रक्ष्यंतिपुरुषाःक्वचित् नार्यश्चाविधवानित्यंभविष्यंतिपतिव्रताः ९१ नचाग्निजंभयंकिंचिन्नाप्सुम
ज्जंतिजंतवः

वा०रा० त्वातीरंमहोदधेः समुद्रंक्षोभयामासशरैरादित्यसन्निभैः ७९ दर्शयामासचात्मानंसमुद्रःसरितांपतिः समुद्रवचना
४ च्चैवनलंसेतुमकारयत् ८० तेनगत्वापुरींलंकांहत्वारावणमाहवे रामःसीतामनुप्राप्यपरांव्रीडामुपागमत् ८१
तामुवाचततोरामःपरुषंजनसंसदि अमृष्यमाणासासीताविवेशज्वलनंसती ८२ ततोग्निवचनात्सीतांज्ञात्वा
विगतकल्मषां अग्रहीदमलांरामोबवनंत्रयगुरोस्तदा॰ कर्मणातेनमहतात्रैलोक्यंसचराचरं ८३ सदेवर्षिगणंतुष्टं
राघवस्यमहात्मनः बभौरामःसंप्रहृष्टःपूजितःसर्वदैवतैः ८४ अभिषिच्यचलंकायांराक्षसेंद्रंविभीषणं कृतकृत्यस्त
दारामोविज्वरःप्रमुमोदह ८५ देवताभ्योवरंप्राप्यसमुत्थाप्यचवानरान् अयोध्यांप्रस्थितोरामःपुष्पकेणसुहृद्वृतः ८६
भरद्वाजाश्रमंगत्वारामःसत्यपराक्रमः भरतस्यांतिकेरामोहनुमंतंव्यसर्जयत् ८७ पुनराख्यायिकांजल्पन्सुग्रीवस
हितस्तदा पुष्पकंतत्समारुह्यनंदिग्रामंययौतदा ८८ नंदिग्रामेजटांहित्वाभ्रातृभिःसहितोनघः रामःसीतामनुप्रा
प्यराज्यंपुनरवाप्तवान् ८९ प्रहृष्टमुदितोलोकस्तुष्टःपुष्टःसुधार्मिकः निरामयोह्यरोगश्चदुर्भिक्षभयवर्जितः ९०॥
नवातजंभयंकिंचिन्नापिज्वरकृतंतथा ९२ नचापिक्षुद्भयंतत्रनतस्करभयंतथा नगराणिचराष्ट्राणिधनधान्ययुता राम
निच ९३ नित्यंप्रमुदिताःसर्वेयथाकृतयुगेतथा अश्वमेधशतैरिष्ट्वातथाबहुसुवर्णकैः ९४ गवांकोट्ययुतंदत्वाविद्व ४

चनंविभगकृत्वंसहभार्यया ऋषिपुत्रःप्रतिश्रुत्यतथेत्याहनृपंतदा २१ सनृपेणाभ्यनुज्ञातःप्रययौसहभार्यया तावन्योन्यं
जलिंकृत्वातौश्लिलेस्नेहाघ्यचोरसा २२ ननंदतुर्दशरथोरोमपादश्चवीर्यवान् ततःसुहृदमापृच्छ्य प्रस्थितोरघुनंदनः २३ पौ
रेषुप्रेषयामासदूतान्वैशीघ्रगामिनः क्रियतांनगरंसर्वंक्षिप्रमेवस्वलंकृतं २४ धूपितंसिक्तसंमृष्टंपताकाभिरलंकृतं॥
ततःप्रहृष्टाःपौरास्तेश्रुत्वाराजानमागतं २५ तथाचक्रुश्चतत्सर्वंराज्ञोयत्प्रेषितंतदा ततःस्वलंकृतंराजानगरंप्रविवे
शह २६ शंखदुंदुभिनिर्ह्रादैःपुरस्कृत्वाद्विजर्षभं ततःप्रमुदिताःसर्वेदृष्ट्वावैनागराद्विजं २७ प्रवेश्यमानंसत्कृत्यन
रेंद्रेणेंद्रकर्मणा यथादिविसुरेंद्रेणसहस्राक्षेणकाश्यपं २८ अंतःपुरंप्रवेश्यैनंपूजांकृत्वाचशास्त्रतः कृतकृत्यंतदात्मानं
मेनेतस्योपवाहनात् २९ अंतःपुराणिसर्वाणिशांतांदृष्ट्वातथागतां सहभर्त्राविशालाक्षीप्रीत्यानंदमुपागमन् ३० पूज्यमानातु
ताभिःसाराज्ञाचैवविशेषतः उवासतत्रसुखिताकंचित्कालंसहद्विजा ३१ इत्यार्षेरामायणेबालकांडेएकादशःसर्गः ११ ततःका
लेबहुतिथेकस्मिंश्चित्सुमनोहरे वसंतेसमनुप्राप्तेराज्ञोयष्टुंमनोभवत् १ ततःप्रणम्यशिरसातंविप्रंदेववर्णिनं यज्ञायवरया
माससंतानार्थंकुलस्यच २ तथेतिचसराजानमुवाचवसुधाधिप संभाराःसंभ्रियंतांतेतुरगश्चविमुच्यतां ३ सरय्वाश्चोत्तरेतीरे
यज्ञभूमिर्विधीयतां ततोब्रवीन्नृपोवाक्यंब्राह्मणान्वेदपारगान् ४ सुमंत्रावाहयक्षिप्रमृत्विजोब्रह्मवादिनः सुयज्ञंवामदेवंच

वा०रा० जाबालिमथकाश्यपं ५ पुरोहितंवसिष्ठंचयेचान्येद्विजसत्तमाः ततःसुमंत्रस्त्वरितंगत्वात्वरितविक्रमः ६ समानयत्सतान्सा
१५ र्वान्समस्तान्वेदपारगान् तान्पूजयित्वाधर्मात्माराजादशरथस्तदा ७ धर्मार्थसहितंयुक्तंश्लक्ष्णंवचनमब्रवीत् ममतातप्यमा
नस्यपुत्रार्थंनास्तिवैसुखं ८ पुत्रार्थंहयमेधेनयक्ष्यामीतिमतिर्मम तदहंयष्टुमिच्छामिहयमेधेनकर्मणा ९ ऋषिपुत्रप्रभावे
नकामान्प्राप्स्यामिचाप्यहं ततःसाध्वितितद्वाक्यंब्राह्मणाःप्रत्यपूजयन् १० वसिष्ठप्रमुखाःसर्वेपार्थिवस्यमुखाच्च्युतं ऋ
ष्यशृंगपुरोगाश्चप्रत्यूचुर्नृपतिंतदा ११ संभाराःसंभ्रियंतांतेतुरगश्चविमुच्यतां सरय्वाश्चोत्तरेतीरेयज्ञभूमिर्विधीयतां १२
सर्वथाप्राप्स्यसेपुत्रांश्चतुरोमितविक्रमान् यस्यतेधार्मिकीबुद्धिरियंपुत्रार्थमागता १३ ततःप्रीतोभवद्राजाश्रुत्वातुद्विजभा
षितं आमात्यानब्रवीद्राजाहर्षेणेदंशुभाक्षरं १४ गुरूणांवचनाच्छीघ्रंसंभाराःसंभ्रियंतुमे समर्थाधिष्ठितश्चाश्वःसोपाध्यायोवि
मुच्यतां १५ सरय्वाःश्चोत्तरेतीरेयज्ञभूमिर्विधीयतां शांतयश्चाभिवर्धंतांयथाकल्पंयथाविधि १६ शक्यःकर्तुमयंयज्ञःसर्वेणा
पिमहीक्षिता नापराधोभवेत्कष्टोयद्यस्मिन्क्रतुसत्तमे १७ छिद्रंहिमृगयंत्येतेविद्वांसोब्रह्मराक्षसाः विधिहीनस्ययज्ञस्यसद्यः
कर्ताविनश्यति १८ तद्यथाविधिपूर्वंमेक्रतुरेषसमाप्यते तथाविधानंक्रियतांसमर्थाःकरणेष्विह १९ तथेतिचततःसर्वेमं रामः
त्रिणःप्रत्यपूजयन् पार्थिवेंद्रस्यतद्वाक्यंयथाज्ञप्तमकुर्वत २० ततोद्विजास्तेधर्मज्ञमस्तुवन्पार्थिवर्षभं अनुज्ञातास्ततःसर्वेपु १५

वीत् १५ नातिक्रांतमिदं लोके पुरुषेणेह केनचित् तव सभ्रातृभार्यस्य वासः प्राकृतवद्वने १६ न मन्ये ब्रह्मचर्ये वा स्वधीते वा फलोदयैः मार्दवार्जवयोर्वापि त्वां चेद्व्यसनमागतं १७ स हराघववैदेह्या भ्रात्रा चैव वने वसन् त्वं गतिं प्राप्स्यसे वीर त्रीं ल्लोकांस्तु जयन्निव १८ वयं खलु हता राम यत्त्वयाप्युपवंचिताः कैकेय्या वशमेष्यामः पापाया दुःखभागिनः १९ इति ब्रुवन्नात्मसमः सुमंत्रः सारथिस्तदा दृष्ट्वा दूरंगतं रामं दुःखार्त्तो रुरुदे चिरं २० ततस्तु विगते बाष्पे सूतं स्पृष्टोदकं शुचि रामस्तु मधुरं वाक्यं पुनः पुनरुवाच तं २१ इक्ष्वाकूणां त्वया तुल्यं सुहृदं